# Shri Yoganandacharyavirachitam Bhaktitrayanirupanam

# શ્રીયોગાનન્દાચાર્યવિરચિતં ભક્તિત્રયનિરુપણમ્

## Document Information

Text title : Shri Yoganandacharyavirachitam Bhaktitrayanirupanam

File name : bhaktitrayanirUpaNamyogAnandAchArya.itx

Category : raama, rAmAnanda

Location : doc_raama

Author : yogAnandAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીયોગાનન્દાચાર્યવિરચિતં ભક્તિત્રયનિરૂપણમ્

રામં સર્વેશ્વરં ચાથાનન્દભાષ્યવિધાયકમ્ ।
ગુરું નત્ત્વા ચ કુર્વેઽહં ભક્તિત્રયનિરૂપણમ્ ॥ ૧॥

ભક્તિઃ -
ભક્તિઃ સ રાઘવે સ્નેહઃ સર્વેભ્યશ્ચાધિકો હિ યઃ ।
તયૈવ પ્રાપ્યતે મોક્ષો નાન્યથેતિ સુનિશ્ચિતમ્ ॥ ૨॥

માનસી કાયિકી ચાથ વાચિકીતિ ત્રિધા હિ સા ।
૧- માનસી ભક્તિઃ
તત્રાદિમા ચ રામસ્ય સ્મરણં યન્નિરન્તરમ્ ॥ ૩॥

પોષણાદૌ સ્વદેહસ્યૌદાસીન્યં સમુપાગતઃ ।
આત્મદેહાદિકં સર્વં શ્રીરામાય સમર્પયેત્ ॥ ૪॥

મનસા રાઘવે સખ્યં કુર્યાચ્ચ શ્રદ્ધયા ખલુ ।
અપહાય તથા સર્વં રામમેવ સમાશ્રયેત્ ॥ ૫॥

૨- કાયિકી ભક્તિઃ
દ્વિતીયા શ્રૃણુયાન્નિત્યં શ્રોત્રાભ્યાં રામસત્કથામ્ ।
શ્રીરામ-મન્દિરે કુર્યાત્ કાયેન માર્જનાદિકમ્ ॥ ૬॥

અમોઘં પૂજનં કુર્યાદ્ રામસ્ય દર્શનં તથા ।
સંસેવ્ય રામપાદૌ ચ સાષ્ટાઙ્ગં પ્રણમેત્ સદા ॥ ૭॥

૩- વાચિકી ભક્તિઃ
અહં દાસોઽસ્મિ તે રામ મમાગતેર્ગતિર્ભવ ।
દયાસિન્ધો દયાં કુર્યાદનાર્યે મયિ પામરે ॥ ૮॥

એવં સ્તુતિર્ગુણાનાં ચ વાચાં નામ્નશ્ચ કીર્ત્તનમ્ ।
અમોઘસ્તવરામસ્ય તૃતીયા ભક્તિરુચ્યતે ॥ ૯॥

શ્રીરામાનન્દશિષ્યશ્રીયોગાનન્દવિનિર્મિતમ્ ।
શ્રીરામભક્તિદં ભૂયાદ્ ભક્તિત્રયનિરૂપણમ્ ॥ ૧૦॥

ઇતિ શ્રીયોગાનન્દાચાર્યવિરચિતં ભક્તિત્રયનિરૂપણં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mrityunjay Pandey

*Shri Yoganandacharyavirachitam Bhaktitrayanirupanam*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*